दशबलकारिका

सञ्चिता गुह

दशबलकारिकाग्रन्थसम्पादनार्थं मया मातृकाषट्कं परिदृष्टम्। तत्र मातृकाद्वयं ढाकाविश्वविद्यालये, मातृकात्रयं विश्वभारतीविश्वविद्यालये अपरञ्च कोलिकातास्थ एशियाटिकसोसाइटिनामके प्रतिष्ठाने रक्षितमस्ति। निर्देशार्थं प्रत्येकं मातृकाप्राप्तिस्थाननामानुसारेण एकादिक्रमेण चिह्निता वर्तते यथा ढा. वि.१, ढा. वि. २, वि. भा. १, वि. भा. २, वि.भा. ३, ए.सो. इति।

मातृकाणां परिचयः संक्षेपेण प्रदर्श्यते:

तत्र ढा.वि.१ इति चिह्निता या प्रथमा मातृका तामेव आदर्शरूपेण स्वीकुर्वे। अस्याः संग्रहक्रमाङ्कः 787(B) इति। अस्यां चत्वारि पत्राणि सन्ति प्रतिपत्रं सप्तपङ्क्तयः सन्ति। पत्रस्य परिमाणम् ३६.५ से. मि. × ९.५ से. मि. इति।

ढा. वि. २ इति द्वितीया मातृका 416 (K) इति संग्रहक्रमाङ्केन परिचिता अस्ति। तत्र षट्पत्राणि सन्ति। प्रथमे अन्तिमे च पत्रे षट्पङ्क्तयः इतरेषु च पत्रेषु पञ्चपङ्क्तयः उपलभ्यन्ते। आकृतिस्तावत् ३३.५ से. मि. × ६.५ से. मि. इति।

वि.भा. १ इति तृतीया मातृका एतावत्कालपर्यन्तं संग्रहक्रमाङ्कशून्यं वर्तते। अस्यां पञ्चपत्राणि सन्ति। तृतीयपत्रस्य उभयस्मिन् पृष्ठे षट्पङ्क्तयः सन्ति पत्रान्तरेषु तु उभयत्र पञ्चपङ्क्तयः। आकृतिस्तावत् ३९.५ से. मि. × ९.५ से. मि. इति।

वि. भा. २ इति चतुर्थी मातृका पत्रचतुष्टयात्मिका आकृतिः ४३.५ से. मि. × ८.५ से. मि. इति।

वि.भा. ३ इति पञ्चमी मातृका A/N880 इति संग्रहक्रमाङ्कयुक्ता। आकृतिस्तावत् ३४ से. मि. × ५.५ से. मि. इति। पत्राणि षट् वर्तन्ते।

ए.सो. इति षष्ठमातृकायाः संग्रहक्रमाङ्कः G-2135 इति। अस्यां षट्पत्राणि सन्ति। आकृतिस्तावत् २४.५ से. मि. × ११ से. मि. इति।

अन्तिमं विहाय सर्वासु अन्यासु मातृकासु मध्ययुगीना वङ्गीयलिपिः उपयुक्तास्ति। षष्ठ्यां तावत् नागरीलिपिः उपलभ्यते।

मातृकाषट्कमेतत् पर्यालोच्य दशबलकारिकाग्रन्थस्य पाठः निरूप्यते।

ओं नमो गणेशाय।[१]

ये धातवः सन्ति गणान्तरेषु वर्णार्थनिर्देश[२]पदैरभिन्नाः[३]।

विभिन्नशब्दाः[४] प्रतिबोधनाय[५] रूपाणि तेषां समुदाहरिष्ये।।[६]

भूवादिषूभयपदीबुधबोधनेस्ति रूपद्वयं भवति बोधति बोधतेऽत्र

दैवादिकोसनर्बुधिर्गदितोऽनुदात्ते रूपं तृतीयमपि बुध्यत इत्यत्रसूत्र।।१[७]

पुष्टो[८]पुषिः पृथुगणेप्रथमापदिष्टः क्रैयादिकः स च दिवादिषु संप्रदिष्टः।

रूपत्रयं त्रिषु गणेषु पुषेः प्रयोगात्[९] पुष्णाति पुष्यति कृते शपि पोषतीति।।२[१०]

धातुःष्ठिवुर्निरसने कथितो[११] दिवादौभौवादिकोपिविदितो न समानरूपः[१२]।

निष्ठिव्यतीति भवति श्यनि रूपमेकं निश्ठीवतीत्यपरमस्य भवन्ति[१३] सन्तः।।३[१४]

तौदादिक सृजविसर्ग इति प्रदिष्टो[१५] दैवादिकोपिससृजिः कथितोनुदात्त।

रूपद्वयं सृज्यति सृज्यत इत्यमुष्य तद्बन्निशेर्निशति निश्यनि निश्यते च।।४[१६]

भौवादिकः कृषविलेखन इत्युदात्तेतौदादिकोपिसकृषिः स्वरितानुबन्धः।

रूपन्ततोऽस्य कृषते[१७] कृषतीति पक्षेभूतेलघुपर[१८]गणे शपि कर्षतीति।।५[१९]

भौवादिको लुट्[२०] विलोतन[२१] इत्यमुष्मिन् दैवादिकेपि सति लुट्यति लोटतीति[२२]।

स्नेहार्थकस्य ञिमिदेस्तुगणेन रूपद्वयं भवति मेद्यति मेदतिः[२३]।।६[२४]

धातोः क्षिपप्रेरण इत्यमुष्य तौदादिकस्य स्वरितेन योगात्।

रूपद्वयं स्यात् क्षिपते[२५] क्षिपन्ति[२६] रूपञ्च दिवादि पाठात्।।७[२७]

षिञ्बन्धने स्वादिगणोपदिष्टो निर्द्येश्यते क्रादिगणे च पाठः।

सिनोति ञित्त्वात् सिनुते सिनीते सिनाति रूपाणि भवन्त स्वमूनिः।।८[२८]

यद्वद्रञ्जेरुभयपदिता पश्यते[२९] स्तद्वदेव तौभौवादि मुनिभिरुदितौ तुल्यरूपो दिवादि।

एकैकस्मिन् शपति शपते शप्यते शप्यतीति चातरूपं रजति रजते रज्यते रज्यतीति।।९[३०]

योभुवादिर्भमणवचनो घातिः सोनुदात्तेतद्वद्घूर्णिः स्फुटविकसने यस्तुदादौत्रयोपि।

निर्दिश्यन्ते स्फुटति घुणति स्फोटते घोणते च द्वे द्वे रूपे शपि च भवतो घुर्णते घुर्णतीति।।१०[३१]

भूवादौयः शदिरभिहितः शतनेशौतुदादौद्वावप्येतौ विहित शपशपवप्य भिन्न स्वभावौ[३२]।

शीयदेशे शपि सति शदेः शीयते शीयति च रूपभेदे पठनमनयो र्यद्द्वयोस्तत् सुखार्थं[३३]।।११[३४]

स्पष्टं दिष्टो दिवादौलभितुभि सहितः क्षुभ्यतिः क्र्यादिवर्गे भुवादौ चानुदात्तेदिह शपि लभते तोभते क्षोभते च।

लभ्यत्यन्यत्रे पाठे श्यनि भवति सदा क्षुभ्यति क्षुभ्यतीति क्षुभ्नातीति लभितुभिविषयेपि दृश श्नाविधानात्।।१२[३५]

भुवादौ काशृदीप्ताविति परिपठितो योऽनुदात्ते स एव प्रोक्तस्तावदिवादौ क्षमिरपि सहने नानुदात्तेद्दिवादिः।

काशस्तस्मात् सकाशात् श्यनि शपि च भवतः काश्यते काशते अ द्वे द्वे रूपे क्षमेस्तु क्षमत इति शपक्षाम्यतीति श्या[illegible]हा।।१३[३६]

कडमद इति धातुः कथ्यते भूतुदाद्योः कडति कडति रूपं यद्वयोस्तुल्यमेतत्।

किमुभय गणपाठे कार्यमेतन्नवाच्यं स्वरकृत इति भेदः शपशपोरस्ति यस्मात्।।१४[३७]

खिदिरयमनुदात्तेद्दैन्यवाचीदिवादिः स च भवति रुधादिस्तादृशः सुप्रसिद्धः।

श्नमिकृतलोपेखीत्येकरूपं श्यनिकृत इदमन्यत् खिद्यते चान्यरूपं।।१५[३८]

सम्पर्के पृचिरात्मनेपदीतयादादौगणे सम्मतः पृक्ते तस्य पृणक्ति रूपमपरं रौधादिकस्य श्नमि।

ण्यन्तः वृद्धौधातुर्द्वधुर्द्दिवादि पठितः स्वादिः सूत्रवास च श्नावृध्नोति समृध्यति श्यनिकृते रूपद्वयं सिद्ध्यति[३९]।।१६[४०]

ये भौवादिका धातवः प्रपठितास्तेषांगणे पाठात् स्वार्थे णिचा णिजन्तमपि यद्रूपन्तदाख्यायते।

पूजायां पठितोऽर्हतिर्निचिकृते तस्यार्हत्य इति म्लेच्छेर्म्लेच्छयति रूपमपरं म्लेच्छत्यति स्वार्थं कं।।१७[४१]

वण्टेरेववर्सचेस्तुतद्वदखिलं प्रपठितो हिंसे रुधादिं विना क्र्यादेरेव मन्थतिरयं भौवादिकोपि स्मृतः।

तस्मान्मन्थति मथ्यति श्यनि पदं मथ्नाति रूपत्रयं वञ्चेर्वञ्चति वञ्चयत्यपिर्द्वचीयद्व च हिंसेस्तथा रूपद्वयं सिद्ध्यति।।१८[४२]

त्यागेदवहिर्यथावहतीत्येतद्वहयत्यन्यतः स्यादेवं परिकङ्क्ने च वहतेस्तादृक् प्रयोगद्वयं।

भूशायान्तु विभाजने मदिवटीत्येतद्द्वयं पठ्यते मण्डयति इति मण्डति यथा वण्टेस्तथैव द्वयं।।१९[४३]

लुम्बिस्तुम्बिविहर्दने निगदितः कुम्बिस्तदाच्छादने लुम्बेर्लुम्बतिर्लुम्बत्यपि लुम्बति यथा तुम्बेश्च कुम्बेस्थता।

निर्दिष्टः शुचि शोषणे गणकृतायो वुक्कभाषणे तस्मिन् वुक्कति वुक्कयत्यपि भवत्येसैव शुण्ठेर्गति।।२०[४४]

संघातेपिडिधातुरेवसषिभिभौवादिको भाषितो भामक्रोधे इति प्रयोगनिपुणैश्चौरादिकावप्यमू।

पिण्डेः पिण्डयतीति पिण्डत इति ज्ञेयं प्रयोगोद्वयं भामेर्भामयतीति भामत इति ज्ञेयञ्च रूपद्वयं।।२१[४५]

भूवाद्यवयमस्ति भूषितरलङ्कारे चुरादौगणे तद्वच्चापिविदरणे दलिरतः प्रत्येकमेकार्थकम्।

रूपं दालयतीति सिद्यति दलत्यन्यत्र पाठोछपा भूषेर्भूशयतीति भूषति तथा भौवादिकस्य स्मृतः।।२२[४६]

भूवादौसहिरात्मनेपदीतयाख्यातो गणेमर्षणे निर्दिष्टः सचुरादि धातुषु यथा स्यादाधृषाद्वेत्ययम्।

णिचपक्षे सहतीति सहयति च द्वौस्तः प्रयोग तदा किङ्चान्यत्र निपातने सत इत्येषः प्रयोगः परः।।२३[४७]

धातुर्योरुषरोष इत्त्ययमपि क्षेपिस्तिपिस्तावुभौ पत्येते मुनिभिर्दिवादिषु तथा चौरादिकावप्यसु।

रूपं तिप्यति तेपयत्यपि तिपत्यत्रैव वौदादिके तद्वद्रोषयतीति रुष्यति रूषत्येतत् सतां सम्मतं।।२४[४८]

यश्चौरादिक उच्यते पदगतौ पुरीतथाप्यायने तत्रैकपदीरात्मनेपदी तयाख्यातो दिवादौ पुनः।

एतौ द्वावपिपद्यते पदयते दन्तस्तरूपंपदे पठ्यते पूरेः पूरयतीति पूर्य्यत इति ज्ञेयं समानार्थकम्।।२५[४९]

क्र्यादौवुध्रस उङ्चु इत्यपिश्चौरादिकः पठ्यते तस्य ध्रासयतीति रूपमपरं ध्रस्नाति येषां ध्रसि।

उत्पूर्वस्यगणद्वयेपि पठनं तेषां कृते श्राविश्यावुघस्नाति निगद्यते णिचिकृतेप्युद्ध्रासंसत्यम्मदा ध्रुवम्।।२६[50]

भूवादिविहितोर्च्चति सहिचुरादावाधृषीयस्मृते स्तस्मिन्नर्च्चयतीति चार्च्चति स्वपा चेत्येवमाद्ये गणे।

पाठे किं फलमर्च्चितेः कथमयं धातुः परस्मैपदी सत्यं किन्तु यदास्त तस्य पठनं तत्रान्यथा युज्यते।।२७[51]

चौरादिकोयस्तृपिराधृषीयः स्वादौदिवादौ पठितः स एवः।
तृप्नति सम्तृप्यति तर्पयन्ति रूपाणि चामूनि भवन्ति तस्य।।२८[52]
मृषिस्तितिक्षावचनंश्चुरादि स्मृतो दिवादिऽसौ स्वरितानुवन्धः।
पदद्वयं मृष्यति मृष्यते च तृतीयमस्मिद्वि मर्षयन्ति।।२९[53]
वेत्तिरूपं विदज्ञाने विन्तेविद् विचारणे।
विद्यते विदसत्तायां लाभे विन्दते।।३०[54]
आदादिकोवचभाषणेऽस्ति चौरादिकोप्यसौवचि राधृषीयः।
तस्मान्निचायतीतिरूपं पक्षेवचन्त्यन्यगणे च वक्ति।।३१[55]
ईडस्तुतौ यः पठितश्चुरादावादादिकोप्येषव थानुदात्ते।
निचीडयत्यत्र शपोलुगिष्टे द्वैरूप्यमेकार्थमिदं वदन्ति।।३२[56]

वृजिरयमनुदात्तो वर्जनेऽदादिविदित् स च भवति रुधादाधृषीयश्चुरादिः।
णिचिकृतमिदमेकं वर्जयत्यपरमपि च वृक्ते रूपमुक्तं वृणक्ति।।३३[57]

नवमगणनिविष्टो ज्जृर्वयोहानिवाचि स च भवति चुरादावाधृयस्ततोस्मिन्।
णिचि सति पदमेकं जरयित्ये तदेवं जरति शपि च पक्षे श्नाविधाने जृणाति।।३४[58]

धुञ्प्रीञावाधृषीयौ दशमगणगतौ कम्पने तर्पणेयौ तौ क्र्यादीतत्र
धूञो णिचि लुकि च कृते धूनयत्येकरूपं।
चात्ररूपञ्च ञित्त्वाद्धवति धवते श्नाधुनीते धुनीति प्रीणाति प्रीनयति
प्रयत इति ञि द्वे द्वे पदे वेदितव्ये।।३५[५९]

शक्तौशकिर्य: पठितो दिवादौ सोयं प्रसिद्ध: स्वरितानुबन्ध:।
रूपद्वयं शक्यति शक्यते च शक्नोति रूपञ्च सूञादि पठात्।।३६[६०]

नानागणस्थानसुविसृष्ठधातुनेकत्रचक्रेरनपधियं हिताय
अध्यापकोयंसुतरां प्रसिद्धोवालोत्तरोविंशतितुल्यभाग। इति
दुर्गसिंहविरचिता दशबलकरिका समाप्ता[६१]।। श्रीदूर्गा श्रीदूर्गा। श्रीराम
चन्द्र देव शर्मण स्वाक्षरं स्वयं पाठार्थ:। इति सन् १७५४ तां ५ आग्रान।।

व्यवहृतमातृकासु प्रायेण किमपि लिपिलेखनवैशिष्टं नास्ति। केवलं र-कार-ब-कारयोर्भेद: न स्पष्टतया दर्शित:। क इह ग्रन्थकार इति प्रश्ने वैमत्यमुपलभ्यते। तथाहि आदर्शरूपेण गृहीता या ढा.वि.१ इति प्रथमा मातृका तत्र पुष्पिकायां दुर्गसिंहविरचिता एता: कारिका इति लिखितम्। ढा. वि. २ इत्यत्रापि समान उल्लेख:। इतरासु चतसृषु मातृकासु ग्रन्थकारस्य नाम न उल्लिखितम्। परन्तु 'वरेन्द्र मिउजियाम लाइब्रेरि' इति नाम्ना प्रसिद्धे रजशाहिनगरस्थे मातृकासंग्रहालये संरक्षिता या मातृका तत्र तु ग्रन्थोऽयं पुरुषोत्तमकृत: इति उल्लिखित:। 'New Catalogus Catalogorum' इत्यत्र पुन: दशबलकारिका दशबलनाम्ना केनापि विरचिता इति उल्लिख्यते। ग्रन्थस्यास्य संक्षिप्तसारसम्प्रदाये अन्तर्भावश्च तत्र सिद्धान्तित:। परन्तु दुर्गसिंहो यदि ग्रन्थकृत् स्यात् तर्हि अवश्यमेवास्य कातन्त्रसम्प्रदाये अन्तर्भाव: स्यात्।

ईशवीय १९२४ तमे अब्दे कातन्त्रगणमाला इति ग्रन्थस्य परिशिष्टभागे दशबलकारिका मुद्रापिता आसीत्। कोलिकातास्थसंस्कृतसाहित्यपरिषद् ग्रन्थागारे ग्रन्थोऽयं संगृहीत: अस्ति। तत्रत्यपाठेन सह मातृकाधृतनं पाठं विचार्य्य सम्पादितपाठ: निर्धारित:। ढा. वि. १ इति विहाय

मातृकापञ्चकेस्मिन् कुत्रापि लेखनस्य कालः न उल्लिखितः। प्रथममातृकाकालस्तावत् १७५४ सम्वत्(?), अग्रहायणस्य पञ्चमे दिवसे मातृका इयं समाप्तिम् अगात्। बहूनां मातृकानां बहुत्र उपलम्भात् अनुमीयते ग्रन्थोऽयं विद्वत्सु सुगृहीतः प्रियश्च आसीत्। संस्कृतव्याकरणसम्प्रदायेषु एतादृशा इतरे च ग्रन्थाः प्रसिद्धाः वर्तन्ते। तेषु हलायुधकृतं कविरहस्यम्, श्रीकृष्णशर्म्मविरचितः दधाधातुप्रयोगः, वादीन्द्राचार्यकृता वसुधातुकारिका अपरा च दशधातुरूपमाला प्रसिद्धिं गताः।

तत्र षट्मातृकासु श्लोकसंख्या सर्वत्र समाना नास्ति। ढा. वि. १ वि. १वि. भा. १ इति मातृकयोः षट्त्रिंशत् ढा.बि. २ इति मातृकायां सप्तत्रिंशत् च वि.भा. २ वि.भा.३ ए.सो. इति मातृकासु चतुस्त्रिंशत् श्लोकाः सन्ति। दशबलकारिकाग्रन्थे चतुःपञ्चाशत् धातवः समुल्लिखिता भवन्ति। तथाहि अकारादिक्रमेण धातोर्नामगणरूपाणि च अत्र सारण्याम् उल्लिखितानि—

धातुः	गणः	रूपाणि
अर्च्च	भ्वादि, चुरादि	अर्च्चति, अर्च्चयति
ईड	चुरादि	ईडयति
कड	भ्वादि, तुदादि	कडति, कडति
काश्	भ्वादि, दिवादि	काशते, काश्यते
कुम्बि	भ्वादि, चुरादि	कुम्बति, कुम्बयति
कृष्	भ्वादि, तुदादि	कृषति, कृषते, कर्षति
क्षम्	भ्वादि, दिवादि	क्षमते, क्षाम्यति
क्षिप्	तुदादि, दिवादि	क्षिपते, क्षिपन्ति, क्षिप्यन्ति
क्षुभ्	भ्वादि, दिवादि, क्र्यादि	क्षोभते, क्षुभ्यति, क्षुभ्नाति
खिद्	दिवादि	खिद्यते
घु	भ्वादि, तुदादि	घुणति, घोणते
गूर्णि	भ्वादि, तुदादि	घूर्णति, घूर्णते
जॄ	क्र्यादि	जरति, जृणाति

तिप्	भ्वादि, चुरादि, तुदादि	निपति, तेपयति, तिप्यति
तुभ्	भ्वादि, दिवादि	तोभते, तुभ्यति
तृप्	चुरादि, दिवादि, स्वादि	तर्पयन्ति, तृप्यति, तृप्नोति
दल्	भ्वादि, चुरादि	दलति, दलयति
धूञ्	क्र्यादि	धुनाति, धुनीते
ध्रस्	चुरादि, क्र्यादि	ध्रासयति, ध्रस्नाति
निश्	तुदादि, दिवादि	निशति, निश्यते
पद्	चुरादि, दिवादि	पदयते, पद्यते
पिण्ड्	भ्वादि, चुरादि	पिण्डति, पिण्डयति
प्री	क्र्यादि, चुरादि	प्रीणाति, प्रीणयति
पुष्	भ्वादि, क्र्यादि, दिवादि	पोषति, पुष्णाति, पुष्यति
पूर्	चुरादि, दिवादि	पूरयति, पुर्य्यति
पृच्	अदादि, रुधादि	पृक्ते, पृणक्ति
वच्	अदादि, चुरादि	वचन्ति, वक्ति
वञ्च्	भ्वादि, चुरादि	वञ्चति, वञ्चयति
वण्ट्	भ्वादि, चुरादि	वण्टति, वण्टयति
विद्	दिवादि, स्वादि	विद्यते, विन्दते
वुक्क	वुक्कति, वुक्कयति	
बुध्	भ्वादि, दिंवादि	बोधति, बोधते, बुध्यते
वच्	अदादि, रुधादि, चुरादि	वृक्ते, वृणक्ति, वर्जयति
भाम्	भ्वादि, चुरादि	भामति, भामयति
भूष्	भ्वादि, चुरादि	भूषति, भूषयति
मन्थ्	भ्वादि, रुधादि, क्र्यादि	मन्थति, मथ्यति, मथ्नाति
मण्ड	भ्वादि, रुधादि	मण्डति, मण्डयति
मिद्	भ्वादि, दिवादि	मेदति, मेद्यति
मृष्	दिवादि, चुरादि	मृष्यति, मृष्यते, मर्षयन्ति
म्लेच्छ	भ्वादि, चुरादि	म्लेच्छति, म्लेच्छयति
रञ्ज्	भ्वादि, दिवादि	रजति, रजते, रज्यति, रज्यते
रुष्	भ्वादि, चुरादि, तुदादि	रुषति, रोषयति, रुष्यति
लभ्	भ्वादि	लभते

लुट्	भ्वादि, दिवादि	लोटति, लुट्यति
लुम्बि	भ्वादि, चुरादि	लुम्बति, लुम्बयति
शक्	दिवादि, स्वादि	शक्यति, शक्यते, शक्नोति
शप्	भ्वादि, दिवादि	शपति, शपते, शप्यति, शप्यते
शी	भ्वादि, तुदादि	शीयति, शीयते
षिञ्	स्वादि, क्र्यादि	सिनोति, सिनुते, सिनाति, सिनीते
ष्ठिवु	भ्वादि, दिवादि	निष्ठीवति, निष्ठिव्यति
सह	भ्वादि, चुरादि	सहति, साहयति
सृज	तुदादि, दिवादि	सृजति, सृज्यति
स्तुम्बि	भ्वादि, चुरादि	स्तुम्बति, स्तुम्बयति
स्फुट्	भ्वादि, तुदादि	स्फुटति, स्फोटते

पादटीका:

१। ढा.वि.२–ओँनमो गणेशाय। अथ दशबलकारिका लिख्यते। वि.भा.१–श्रीश्रीकृष्णो जयति। वि.भा.३–श्रीहरि

२। ढा. वि. २–निर्द्दिष्ट

३। वि.भा.२–पदैर्बिभिन्ना

४। वि.भा.१, वि.भा. २, वि.भा.–रूप

५। ढा.वि. १, वि.भा.१, वि.भा.२, वि.भा.३–प्रतिपादनाय, ए.सो.–प्रतिपादनार्थम्

६। वि.भा.३, ए.सो.–श्लोकक्रमाङ्कः२

७। वि.भा. ३, ए.सो.–श्लोकक्रमाङ्कः२

८। वि.भा.३–पुष्णौ, ए.सो.–पुष्टौ

९। ए.सो.–प्रवेशात्

१०। वि.भा.३, ए.सो.–श्लोकक्रमाङ्कः३

११। वि.भा.१, ए.सो.–गदितो

१२। वि.भा.१,, वि.भा.२–विदितोप्यसमानरूपः, ए.सो. भौवादिरप्यभिमतः ससमानरूपः

१३। ढा.वि.२-शपा वदन्ति, वि.भा.१, वि.भा.२, वि.भा.३-वदन्ति, ए.सो.-वंदति संत:

१४। वि.भा. ३, ए.सो.-श्लोकक्रमाङ्कः ४

१५। वि.भा.१,, वि.भा. ३३, ए.सो.-प्रसिद्धो

१६। वि.भा.१-र्निशति निश्यतैत्यपीह, वि.भा.२--र्निशति क्ता: श्यनि निश्यते च, वि.भा.३-वापि च निश्यते च, ए.सो.-तद्वल्लिशेर्लिशतिशेश्यनिलिश्यतेच

१७। वि.भा.३-कृषतो

१९। ढा.वि. २, बि.भा.१, ए.सो.-लघूपध

१९। वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः ६

२०। वि.भा.१, ए.सो.-लुठ्

२१। वि.भा.१-विलोडन, ए.सो.-विहोरण

२२। वि.भा.१, ए.सो.-लुठ्यति लोठतीति

२३। ढा.वि. २-मेदति मेद्यते च, ए.सो.-मेद्यति मेदते च

२४। वि.भा.३, ए.सो.-श्लकक्रमाङ्कः७

२५। ढा.वि.२-क्षिपति

२६। वि.भा.२-क्षिपन्ते

२७। वि.भा. ३, ए.सो.-श्लोकक्रमाङ्कः ८

२८। वि.भा. ३, ए.सो.-श्लोकक्रमाङ्कः ९

२९। ढा.वि.२-तद्वद्रूपं, वि.भा.१-तावद्रूपं, वि.भा.३-रञ्जेरूपं

३०। वि.भा. ३३, ए.सो.श्लोकक्रमाङ्कः ११

३२। ढा. वि. २, वि.भा. १, वि.भा. २, ए.सो.-स्वरूपौ

३३। वि.भा.१, वि.भा.२-स्वरार्थं, वि.भा.३-परार्थं

३४। वि.भा. ३, ए.सो.श्लोकक्रमाङ्कः १२

३५। वि.भा. ३, ए.सो.श्लोकक्रमाङ्कः १३

३६। वि.भा. ३, ए.सो.श्लोकक्रमाङ्कः १४

३७। वि.भा. ३, ए.सो.श्लोकक्रमाङ्कः १५

३८। वि.भा. ३, ए.सो.श्लोकक्रमाङ्कः १६

३९। ढा.वि.२, ए.सो.-ण्यन्तात् पर्च्चति पर्च्चयत्यपि तथा स्यादाधृषीयातुतोरञ्चेरेवं वित्यस्तुतंदवदानं हिंसे रुधादिं विना, वि.भा. १, वि.भा. २, वि.भा.३-ण्यन्तः संयमने विकल्पित इति ख्यातं तदत्र द्वयं रूपं पर्च्चति पर्च्चयत्यपि परं न्यायेन च व्याख्याया

४०। वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः १७

४१। वि.भा.१, ए.सो.-श्लोकक्रमाङ्कः १९, वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः २०

४२। वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः १९, वि.भा.३, ए.सो.-श्लोकोऽयं न वर्तते

४३। ढा.वि. २, वि.भा.१, ए.सो.-श्लोकक्रमाङ्कः २० वि.भा.१, ए.सो.-श्लोकक्रमाङ्कः २१

४४। ढा.वि. २, वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः २२, वि.भा.१, ए.सो.-श्लोकक्रमाङ्कः २०

४५। ढा.वि. २, वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः २३, वि.भा.१, ए.सो.-श्लोकक्रमाङ्कः २२

४६। ढा.वि. २, वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः २४, वि.भा.१, ए.सो.-श्लोकक्रमाङ्कः २३

४७। ढा.वि. २, वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः २५, वि.भा.१, ए.सो.-श्लोकक्रमाङ्कः २४

४८। ढा.वि. २, वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः २६, वि.भा.१, ए.सो.-श्लोकक्रमाङ्कः २५

४९। ढा.वि. २, वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः २७, वि.भा.१, ए.सो.-श्लोकक्रमाङ्कः २५

५०। ढा.वि. २, वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः २८, वि.भा.१, ए.सो.-श्लोकक्रमाङ्कः २७

५१। ढा.वि. २, वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः २८, वि.भा.१, ए.सो.-श्लोकक्रमाङ्कः २८, वि.भा.२, ए.सो.-श्लोकोऽयं न वर्तते

५२। ढा.वि. २, वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः २९, वि.भा.१, ए.सो.-श्लोकक्रमाङ्कः २८

५३। ढा.वि. २, वि.भा.३, ए.सो.-श्लोकक्रमाङ्कः ३०, वि.भा.१, ए.सो.-श्लोकक्रमाङ्कः २९

५४। ढा.वि. २-श्लोकक्रमाङ्कः ३७, वि.भा.१-श्लोकक्रमाङ्कः १७, वि.भा.२, वि.भा. ३-श्लोकक्रमाङ्कः १८, ए.सो.-श्लोकोऽयं न वर्तते

५५। ढा.वि. २-श्लोकक्रमाङ्कः २९, वि.भा.१-श्लोकक्रमाङ्कः ३०, वि.भा.३-श्लोकक्रमाङ्कः ३२, ए.सो.-श्लोकक्रमाङ्कः ३०

५६। वि.भा.२, ए.सो.-श्लोकक्रमाङ्कः ३१, वि.भा.३-श्लोकक्रमाङ्कः ३३

५७। वि.भा.२, ए.सो.-श्लोकक्रमाङ्कः ३२, वि.भा.३-श्लोकक्रमाङ्कः ३४

५८। वि.भा.२, ए.सो.-श्लोकक्रमाङ्कः ३३, वि.भा.३-श्लोकक्रमाङ्कः ३५

५९। वि.भा.२, ए.सो.-श्लोकक्रमाङ्कः ३४, वि.भा.३-श्लोकक्रमाङ्कः ३६

६०। वि.भा.२, ए.सो.-श्लोकक्रमाङ्कः ३५, वि.भा.३-श्लोकोऽयं न वर्तते

६१। ढा.वि. २-इति दुर्गसिंहविरचिता दशबलकारिका समाप्ता।। परिपूर्व्व परापूर्व्वाश्चा भिपूर्व्वस्तथैवच। अनुपूर्व्वश्यभूधातुर्ब्बुधैर्ज्ञेयः सकर्म्मकः।। जयतेर्नास्तिपन्चस्याङ् तु पुरुषः क्वचित्। रचेरन्तन्तुशंन्तृडिः प्रयोगोनाभिधीयते।।

वि.भा.१-षट्त्रिंशताश्लोकनिबन्धनेन धातुनासौ स्वीकृत चानुमहाधीः। अध्यापकोयं सुतरां प्रसिद्धो वलोत्तरो विंशतितुल्यभागः। इति दशबलकारिका समाप्ता।।

वि.भा. २, वि.भा.३-समाप्तेयंदशबलकारिकेति।।

ए.सो.-इति दशबलकारिका समाप्तिमगमत्।।